दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णत्रयोदशी
ज्येष्ठ 01 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-202 | 1 | मई 15, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 सुक्खु-सर्वकारस्य 'एण्टी-चिट्टा-प्रतिमानेन' अन्यानि राज्यानि शिक्षिष्यन्ते, एनसीबी इत्यनेन हिमाचलप्रदेशात् प्रतिवेदनं याचितम्

3 आईपीएल २०२६: धर्मशालानगरे मुम्बईदलस्य विजयतिलकः, किंग्स-दलस्य निरन्तरं पञ्चमी पराजयः

4 रक्तदुर्ग-विस्फोटप्रकरणे ७५०० पृष्ठानां दोषारोपपत्रं (Charge sheet) समर्पितम्, एनआईए (NIA) दलेन १० जनाः आरोपिताः

## नवदेहल्यां द्विदिवसीय-ब्रिक्स-विदेश-मन्त्रिणां सम्मेलनस्य आरम्भः अभवत्



प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदेहल्यां ब्रिक्स-विदेशमन्त्रिमण्डलस्य विदेशमन्त्रिभिः सह मेलनं कृतम्। रूस-देशस्य विदेशमन्त्री सर्गेई लावरोवः, ईरान-देशस्य विदेशमन्त्री अब्बास अराघची, दक्षिण अफ्रीका-देशस्य विदेशमन्त्री रोनाल्ड लामोला, ब्राज़ील-देशस्य विदेशमन्त्री माऊरो विएरा इत्यादयः प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मिलितवन्तः। इदम् उपवेशनं नवदेहल्यां प्रचलिते ब्रिक्स-विदेशमन्त्रिमण्डलस्य सम्मेलनानन्तरम् अभवत्। ततः पूर्वं, विदेश-मन्त्री डा. एस. जयशङ्करः स्वस्य प्रारम्भिक भाषणे उक्तवान् यत् वैश्विक व्यवस्थायाः केन्द्रस्थाने शान्तिः सुरक्षा चास्ति। सः अवदत् यत् अद्यतनीयाः संघर्षाः केवलं संवादस्य कूटनीतेः च महत्त्वं प्रदर्शयन्ति। सः अवधानं दत्तवान् यत् वर्तमान-संघर्षाः, आर्थिक-अनिश्चितताः, व्यापारस्य, तन्त्रज्ञानस्य, ऋतुदशा समाह्वानानि च वैश्विक परिदृश्यं निर्मीयन्ते, तथा च अस्मिन् विषये ब्रिक्सदेशाः रचनात्मक-स्थिरतां च आनेतुं महत्वपूर्णां भूमिकां निर्वहन्ति। डा. जयशङ्करः सहभागीदेशानां तेषां उपस्थित्यै, ब्रिक्स-संरचनायाः अन्तः सहकारं सुदृढीकरणाय निरन्तरं प्रतिबद्धतायै च धन्यवादम् अददात्। ऊर्जायाः, आहारस्य, उर्वरकस्य, स्वास्थ्यसुरक्षायाः च विषये नैकेदेशाः निरन्तरं समाह्वानानां सम्मुखीकरणं कुर्वन्तः सन्ति इति मन्त्रिणा उक्तम्।

## राष्ट्रिय-आपद्-प्रतिक्रिया-बलेन सम्पूर्ण देशे जनानां विश्वासम् अर्जितम्



केन्द्रीय-गृह-मन्त्री अमितशाहः अवदत् यत् एन. डी. आर. एफ. इति राष्ट्रिय-आपद्-प्रतिक्रिया-बलेन विंशति वर्षाणाम् अल्पावधौ सम्पूर्ण देशे चत्वारिंशोत्तरैकशत कोटि-जनानां विश्वासम् अर्जितम्। गृहमन्त्रिणा अधोरेखितं यत् यत्र यत्र एन. डी. आर. एफ़-दलस्य कर्मचारिणः सम्पूर्ण विश्वे गतवन्तः तत्र ते जनानां प्रेमं विश्वासञ्चार्जितवन्तः।

## भारतस्य निर्वाचनायोगेन स्पष्टं यथार्थं च मतदातृ-सूचीं सुनिश्चेतुं षोडश-राज्येषु त्रिषु केन्द्र-शासित-प्रदेशेषु च एस्. आई. आर्. इत्यस्य तृतीय- चरणस्य घोषणा कृता



भारतस्य निर्वाचन-आयोगेन विशेष-पुनरीक्षण-संशोधनस्य, एस.आई.आर. इत्यस्य तृतीय-चरणस्य घोषणा कृता, यत् षोडश-राज्येषु त्रिषु केन्द्र-शासित प्रदेशेषु च चरणबद्धरूपेण सञ्चालितं भविष्यति। अस्मिन् चरणे आन्ध्रप्रदेशः, अरुणाचलप्रदेशः, हरियाणा, झारखण्डः, कर्नाटकः, महाराष्ट्रः, मणिपुरः, मेघालयः, मिजोरमः, नागालैण्डः, ओडिशा, पञ्जाबः, सिक्किमः, त्रिपुरा, तेलङ्गाना, उत्तराखण्डेति सम्मिलितानि सन्ति। दिल्ली, चण्डीगढः, दादरा नगर-हवेली, दमन-दीवः इत्येताः केन्द्रशासितप्रदेशाः सन्ति। मतदातृ-सूची-संशोधन-प्रक्रियायां एतत् महत्त्वपूर्णं सोपानम् अस्ति, यस्य उद्देश्यं सम्पूर्ण देशे स्पष्टं यथार्थं च मतदातृ-सूचीं सुनिश्चेतुं भवति।

## प्रधानमन्त्रिणः नरेन्द्रमोदिनः आबुधाबी-यात्रायाः समये भारत-यू. ए. ई. देशौ द्वैपाक्षिक-सम्बन्धान् अग्रिमस्तरे नयितुं सज्जते स्तः



अद्य आबुधाबी-नगरे यदा प्रधानमन्त्रिणः नरेन्द्रमोदिनः यू.ए.ई-देशस्य राष्ट्रपतिना शेख मोहम्मद बिन जायद अल नाह्यान इत्यनेन सह मेलनं भविष्यति तदा भारत-यू. ए. ई. देशयोः मध्ये दृढं सहभागित्वं अग्रिमस्तरे नयितुं सज्जता अस्ति। उभौ नेतारौ समग्र सामरिक-सहभागित्वस्य पूर्णव्याप्तिः समीक्षितवन्तौ, तथा च अनेकेषां महत्त्वपूर्णानां सन्धेः आदानप्रदानस्य साक्षीभूतौ। औपचारिक-सामरिक-रक्षा-सहभागितायाः कृते कार्यं कर्तुम् आशयपत्रम् एव सर्वाधिकं परिणामात्मकम् आसीत्, यत् द्वैपाक्षिक-सुरक्षा-सम्बन्धेषु प्रमुखं सोपानम् आसीत्।

## अमेरिका-देशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्पः तथा चीन-देशस्य राष्ट्रपतिः शी चिनफिंगः इत्येषः च बीजिङ्ग-नगरे महत्त्वपूर्णं वार्तालापं कृतवन्तौ

अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड ट्रम्पेन चीनदेशस्य राष्ट्रपतिना शी चिनफिंग इत्यनेन सह बीजिङ्ग-नगरे वार्तालापः अभवत्। व्यापारस्य, तन्त्रज्ञानस्य, क्षेत्रीयसुरक्षायाः च विषये उद्विग्नतायाः मध्येऽपि उभौ नेतारौ परस्परविरोधस्य विषये सहकारस्य विषये अवधानं दत्तवन्तौ। द्वितीय-राष्ट्रपति-कार्यकाले ट्रम्पस्य चीन-देशस्य एतत् प्रथमं भ्रमणम् अस्ति। व्हाइट-हाउस इत्यस्य अनुसारं, ऊर्जा-मुक्तप्रवाहस्य समर्थनाय होर्मुज़-जलसंधि अवश्यमेव उद्घाटिता भवेत् इति उभौ पक्षौ स्वीकृतवन्तौ। अस्मिन् उक्तं यत्, राष्ट्रपतिना षी-वर्येण सह ट्रम्पस्य मेलनम् उत्तमम् आसीत्। उपवेशनानन्तरं जनसमूहं सम्बोधयन् चीनदेशस्य राष्ट्रपतिः षी-चिनफिंग-वर्यः, चीन-अमेरिका-देशौ प्रतिद्वन्द्विनौ न भूत्वा, सहभागिनौ भवेताम् इति उक्त्वा, संघर्षस्य उपरि सहकारस्य पोषणस्य विषये अवधानं दत्तवान्।

## सुभाषितम्

**बुधाग्रे न गुणान् ब्रूयात्,**
**साधु वेत्ति यतः स्वयम्।**
**मूर्खाग्रेऽपि च न ब्रूयात्**
**तत्प्रोक्तं न वेत्ति सः।।**

भावार्थः- सज्जन और विद्वान व्यक्तियों के सामने अपने गुणों को स्वयं प्रकट नहीं करना चाहिए क्योंकि वे उनको स्वयं ही जान जाते हैं। एक मूर्ख व्यक्ति के सामने भी ऐसा नहीं करना चाहिए क्योंकि बताने पर भी वह उनको समझ नहीं सकता है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## काङ्ग्रेस्-दलस्य नेता वी. डी. सतीशनवर्यः केरलम्-राज्यस्य मुख्यमन्त्री भविष्यति



दशदिनानि यावत् प्रचलितम् उच्च-नाटकीयतां, उत्कण्ठां च समाप्य, काङ्ग्रेस-दलेन वी.डी. सतीशन इत्यस्य नाम केरलम् राज्यस्य नूतन मुख्यमन्त्रीरूपेण घोषितम्। एषा घोषणा नवदेहल्यां वार्ताहरसम्मेलने काङ्ग्रेस-नेताः अजय माकनः, मुकुल वासनिकः, दीपा दासमुन्शी इत्येताः कृतवन्तः। घोषणया सह, काङ्ग्रेस-नेतृत्वे यू. डी. एफ. राज्ये सर्वकारस्य निर्माणं कर्तुं प्रवर्तयिष्यति, येन पक्षे द्वन्द्वः समाप्तः।

# सुक्खु-सर्वकारस्य 'एण्टी-चिट्टा-प्रतिमानेन' अन्यानि राज्यानि शिक्षिष्यन्ते, एनसीबी इत्यनेन हिमाचलप्रदेशात् प्रतिवेदनं याचितम्



हिमसंस्कृतवार्ताः- डॉ पद्मनाभः, शिमला।हिमाचलप्रदेश-सर्वकारस्य 'एण्टी-चिट्टा-प्रतिमानं' यत्र अपराधिनां मेरुदण्डं भङ्क्तुं सफलं जायते, तत्रैव अस्य प्रतिमानस्य चर्चा अन्येषु राज्येषु अपि प्रारब्धा अस्ति। नार्कोटिक्स-कण्ट्रोल-ब्यूरो (NCB) इत्यस्य क्षेत्रीय-कार्यालयेन अस्मिन् विषये हिमाचलप्रदेशात् प्रतिवेदनं याचितम्, येन अस्य प्रतिमानस्य अध्ययनं कृत्वा अन्येषु अपि राज्येषु एतत् प्रवर्तयितुं शक्येत, तथा च चिट्टा-व्यापारे संलिप्तानां अपराधिनां विरुद्धं प्रभाविकार्यविधिं सुनिश्चितां कर्तुं शक्येत। प्रदेशे काङ्ग्रेस-सर्वकारस्य सङ्घटनानन्तरं चिट्टा- समस्यायाः निवारणाय मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना एकस्याः व्यापकयोजनायाः निर्माणाय निर्देशाः दत्ताः। अस्याः योजनायाः अन्तर्गतं चिट्टा-व्यापारे संलिप्तानाम् अपराधीनां पञ्चायतस्तरं यावत् मैपिङ्ग कृता अस्ति।हिमाचलप्रदेशः देशस्य प्रथमं राज्यम् अस्ति, यत्र पञ्चायतेषु चिट्टा-व्यसनकर्तृणां तस्कराणां च परिचयं कृत्वा ते रक्त-पीत-हरितश्रेणिषु विभक्ताः। सर्वेक्षणात् ज्ञातं यत् प्रदेशस्य २३४ पञ्चायतेषु चिट्टा-प्रभावः सर्वाधिकः अस्ति, ताः च रक्त-श्रेण्यां स्थापिताः। एतेषु पञ्चायतेषु प्रभावं न्यूनीकर्तुं मुख्यमन्त्रिणः निर्देशानुसारं आरक्षकाणां निरीक्षणन वर्धितम्, यस्य च सकारात्मकाः परिणामाः सम्मुखं आगच्छन्ति।

हिमाचलस्य एण्टी-चिट्टा-प्रतिमानस्य अन्तर्गतं यत्र अपराधिनां विरुद्धं कठोरा कार्यविधिः क्रियते, तत्रैव पीडितव्यक्तीनां पुनर्वास-प्रक्रियायाम् अपि ध्यानं दीयते। राज्यसर्वकारेण 'पिट-एनडीपीएस' अधिनियं प्रवर्तय १७४ अपराधिनः बन्दीकृताः, ईदृश्यां बृहत्-कार्यविधौ च हिमाचलप्रदेशः सम्पूर्णे देशे प्रथमस्थाने अस्ति। एतदतिरिच्य नशातस्कराणां ५१ कोटिरूप्यकाणां अवैधसम्पत्तयः स्वीकृताः, याः पूर्वमपेक्षया त्रिगुणिताः सन्ति। ७०० तः अधिकेषु प्रकरणेषु अन्वेषणं कृतं, ३०० प्रकरणानां च आर्थिक-अन्वेषणाय सम्पत्ति-जप्तीकरणाय च उपयुक्तता प्राप्ता। राज्यसर्वकारेण पूर्णसंवेदनशीलतया सह पीडितजनानां पुनार्वासाय अपि सकारात्मकाः पदक्षेपाः स्वीकृताः। प्रदेशे नशामुक्ति- पुनर्वास-केन्द्राणां मानाङ्कीकरणस्य योजना अन्तिमचरणे वर्तते। अपि च, नीति-आयोगेन सह एम्स दिल्ली, पीजीआई चण्डीगढ़ इत्यनयोः सहयोगेन सिरमौर- जनपदस्य कोटला-बड़ोग इत्यत्र एकं आधुनिकं पुनर्वासकेन्द्रं निर्मीयते। शीघ्रमेव शिमला- जनपदस्य मशोबरा इत्यत्र काङ्गड़ा-जनपदस्य टाण्डा- आयुर्विज्ञान-महाविद्यालयस्य च पुनर्वासकेन्द्राणि आरप्स्यन्ते। युवसन्ततिं नशादलात् रक्षितुं विद्यालयेषु महाविद्यालयेषु च 'ड्रग-फ्री-कैम्पस' अभियानं, नशा-विरुद्ध-शपथः तथा एण्टी-ड्रग-प्रकोष्ठाः स्थाप्यन्ते।

मुख्यमन्त्रिणः सुक्खु-महोदयस्य एतम् अभियानं सफलीकर्तुं समाजस्य सर्वे वर्गाः सक्रियां भूमिकां निर्वहन्ति। सामाजिक-प्रभावावात् मुक्तं भूत्वा अभिभावकाः स्वयं टोल-फ्री-सङ्ख्यां ११२ उपयुज्य स्वबालकानां व्यसन-मुक्तये साहाय्यं याचन्ते। सर्वकारस्य प्रयासेन यत्र पीडितानां पुनर्वासः सुनिश्चितः भवति, तत्रैव अपराधिनां धैर्यमपि त्रुट्यति। पञ्चायत-निर्वाचनानां पश्चात् अधुना राज्यसर्वकारः चिट्टा-तस्करीं समूलं विनाशयितुम् अस्य अभियानस्य द्वितीयं चरणं प्रारप्स्यते, यत् चिट्टा-तस्कर-इत्यस्य अन्तिमं दण्डं भविष्यति।

# केन्द्रस्य उपेक्षायाः कारणात् उत्साहः न विचलितः भविष्यति, मण्डी-नगरे मुख्यमन्त्रिणा सुक्खुना हिमाचलम् 'आत्मनिर्भरं' कर्तुं कृता सिंहगर्जना



**हिमसंस्कृतवार्ताः- मण्डी।** हिमाचलप्रदेशस्य मुख्यमन्त्रिणा ठाकुर-सुखविन्दरसिंह सुक्खुना मण्डी-नगरनिगमस्य निर्वाचन- गर्जनायाः अन्तराले पूर्वमुख्यमन्त्रिणः जयरामठाकुरस्य केन्द्रसर्वकारस्य च उपरि तीक्ष्णप्रहारः कृतः। तेन स्पष्टशब्देषु उक्तं यत् केन्द्रसर्वकारः हिमालचलेन सह कियत् अपि भेदभावं प्रताड़नं वा कुर्यात्, सः न भीतः भविष्यति। प्रदेशसर्वकारः हिमाचलम् आत्मनिर्भरं कर्तुं दृढतया पदक्षेपान् वर्धयति। तेन उक्तं यत् भाजपा-दलेन जनतायाः उपरि नगरनिगमस्य भारः आरोपितः। टारना, नेला तथा 'टाउन-हॉल' इत्यादिषु स्थानेषु जनसम्बोधनं कुर्वता मुख्यमन्त्रिणा उक्तं यत् भाजपा-शासनकाले नगरनिगमस्य संरचना जनभावनानाम् अनुरूपं न अभवत्। तेन जयरामठाकुरं लक्ष्यीकृत्य उक्तं यत् अद्य सः ग्रामीणक्षेत्रस्य 'बेहना-वार्ड' इत्यस्य निष्कासनस्य वार्तां करोति, यदा तु सत्तायां सति तेन एव एतत् सम्मिलितं कृतम् आसीत्।

मुख्यमन्त्रिणा कटाक्षः कृतः यत् सम्भवतः जयराममहोदयः विस्मृतवान् यत् अधुना तस्य सर्वकारः नास्ति। अधुना सर्वकारः अस्माकम् अस्ति, निर्णयं च वयमेव करिष्यामः। मुख्यमन्त्रिणा आरोपः कृतः यत् जयरामठाकुरः मुख्यमन्त्री भूत्वा केवलं स्वस्य 'सराज' निर्वाचनक्षेत्रस्य ध्यानं कृतवान्, यत्र १८ विश्रामगृहाणि निर्मितानि, किन्तु मण्डी-नगरस्य उपेक्षा कृता। यदा सः सत्तायां आसीत्, तदा सराजस्य विकासः कृतः, अधुना च निर्वाचने आगते सति 'मण्डी मम अस्ति' इति विलापं करोति। तेन भाजपा-दलस्य उपरि 'शिवधाम' इत्यस्य कृते बजट-प्रावधानं न कृतस्य तथा केवलं निर्वाचन-लाभाय विना कर्मचारीभिः संस्थानानां उद्घाटनस्य अपि आरोपः कृतः। प्रधानमन्त्रिणः मोदी-महोदयस्य सहायता-कोषः ('राहत-पैकेज') इत्यस्य घोषणायाः उपरि व्यङ्ग्यं कुर्वता सुक्खु-महोदयेन उक्तं यत् वयं अद्यापि १५०० कोटि-रूप्यकाणां आपदा-सहायतायाः प्रतीक्षां कुर्मः, सम्भवतः सा धनराशिः अधुना सोनीपतनगरे एव संलग्ना अस्ति।

# Dharamshala IPL Match- जसप्रीत-बुमराहस्य दलनायकत्वेन धर्मशालायां पदार्पणम्, प्रथमवारं मुम्बई-दलस्य नेतृत्वं स्वीकृतम्

**हिमसंस्कृतवार्ताः - धर्मशाला।**
एचपीसीए-क्रीडाङ्गणं (धर्मशाला) बृहस्पतिवासरे एकस्य ऐतिहासिकस्य क्षणस्य साक्षि अभवत्। आईपीएल-इतिहासस्य तीव्रतमेषु क्षेपकेषु (Bowlers) गण्यमानः जसप्रीत-बुमराहः पञ्जाब-किङ्गस् विरुद्धं क्रीडायां प्रथमवारं मुम्बई-इण्डियन्स् दलस्य नेतृत्व-दायित्वं निर्वहत्। नियमित-नायकस्य हार्दिक-पाण्ड्या-महोदयस्य उपनायकस्य सूर्यकुमार-यादवस्य च अनुपस्थितौ दल-प्रबन्धनेन बुमराहस्य अनुभवे विश्वासः प्रकटितः। दीर्घकालात् मुम्बई-दलस्य क्षेपण-आक्रमणस्य आधारस्तम्भः बुमराहः, तस्य कृते एतत् उत्तरदायित्वं न केवलं तस्य नेतृत्व-कौशलस्य प्रमाणम् अस्ति, अपितु दले तस्य वर्धमानस्य गौरवस्य अपि परिचायकम् अस्ति। २०१३ तमे वर्षे मुम्बई-इण्डियन्स् दलेन सह स्वकीयं आईपीएल-यात्रां प्रारभमाणः जसप्रीत-बुमराहः स्वस्य सटीक-'यॉर्कर'-क्षेपणैः तीक्ष्ण-क्षेपण-कलया च क्रिकेट्-जगति स्वकीयं प्रभुत्वं स्थापितवान्। सः गते दशके अस्याः संस्थायाः (Franchise) विश्वसनीयतमेषु क्रीडकेषु अन्यतमः रूपेण उदितः अस्ति। धर्मशालायाः रमणीयेषु प्रदेशेषु तस्य नायक-जीवनस्य (Captaincy career) अस्मिन् आरम्भेण एषा क्रीडा प्रशंसकेभ्यः अतिव स्मरणीया जाता।

## क्रीडायाः आरम्भानन्तरमपि पत्रकाणि न विक्रितानि, बहवः मञ्चाः रिक्ताः आसन्

धर्मशाला-क्रीडाङ्गणं पञ्जाब-किङ्गस् तथा मुम्बई-इण्डियन्स् मध्ये जातायाः अस्य स्पर्धायाः समये सः पुरातनः उत्साहः न दृष्टः। स्थितिः एतादृशी आसीत् यत् बृहस्पतिवासरे क्रीडायाः आरम्भानन्तरमपि अन्तर्जाल-पुटे (Online portal) विविध-मञ्चानां पत्रकाणि विक्रयार्थं उपलब्धानि आसन्। ६,५०० रूप्यकतः २०,००० रूप्यक-पर्यन्तं अधिक-मूल्ययुक्तानि 'प्रीमियम्' तथा 'आतिथ्य'-श्रेण्याः पत्रकाणि अन्तं यावत् क्रेतॄन् न प्राप्तवन्ति। क्रिकेट्-प्रेमिणां स्पष्टं कथनम् अस्ति यत् अस्मिन् वारे पत्रकाणां मूल्यं पूर्व-वर्षाणाम् अपेक्षया बहुधा वर्धितम्, येन सामान्य-दर्शकाः क्रीडाङ्गणतः दूरे अतिष्ठन्। आश्चर्यास्पदं तु एतत् यत् क्रीडायाः समये क्रीडाङ्गणस्य अनेकेषु प्रमुखेषु मञ्चेषु आसन्दाः रिक्ताः दृश्यन्ते स्म। विशेषतः 'सीपी प्लस वेस्ट स्टैण्ड्-१', 'सीपी प्लस प्वेलियन् टैरेस्' तथा 'बीकेटी टेयर ईस्ट स्टैण्ड्-३' इत्येतेषु त्रिषु अन्येषु च मञ्चेषु दर्शकानां महती न्यूनता दृष्टा। इतः पूर्वं जातायां क्रीडायाम् अपि अष्ट-मञ्चानां पत्रकाणि क्रीडा-आरम्भं यावत् उपलब्धानि आसन्। स्थानीय-जनेषु एषः चर्चा-विषयः अस्ति यत् धर्मशालायां यथा पूरं सम्मर्दः कोलाहलः च पूर्वं भवति स्म, सः पत्रकाणां मूल्य-वृद्धेः कारणेन अधुना अदृश्यः अस्ति।

# पञ्चायत-निर्वाचनस्य मध्ये शिक्षकविहीनः न भविष्यति कोऽपि विद्यालयः, समीपस्थ-संस्थातः भविष्यति नियुक्तिः




हिमसंस्कृतवार्ताः - शिमला। पञ्चायतीराज-निर्वाचनानां समये शिक्षण-व्यवस्था प्रभाविता न भवेत्, एतदर्थं शिक्षा-निदेशालयेन सर्वे प्रधानाचार्याः मुख्याध्यापकाश्च निर्दिष्टाः. निदेशालयेन उक्तं यत् २६, २८ तथा ३० मई २०२६ दिनाङ्केषु भवितव्येषु पञ्चायत-निर्वाचनेषु महत्यां सङ्ख्यायां शिक्षकाणां निर्वाचन-कार्येषु नियुक्तिः कृता अस्ति. अनेन बहवः 'एकल-शिक्षक-विद्यालयाः' शिक्षकविहीनाः भवेयुः इति आशङ्का वर्तते. येषु विद्यालयेषु केवलं एकः एव शिक्षकः अस्ति अथवा यत्र सर्वेषां शिक्षकाणां निर्वाचन-कर्तव्यं (Duty) अस्ति, तत्र समीपस्थ-विद्यालयेभ्यः अस्थायीरूपेण शिक्षकाणां प्रतिनियुक्तिः (Deputation) भविष्यति. निदेशालयेन स्पष्टीकृतं यत् सम्बद्ध-सङ्कुल-विद्यालयस्य (Complex school) प्रधानाचार्याः सुनिश्चितं करिष्यन्ति यत् निर्वाचन-काले कस्मिन्नपि विद्यालये न्यूनतमातिन्यूनं एकः शिक्षकः अवश्यं भवेत्.

## शिक्षणसंस्थानां प्रधानाचार्याणां मुख्याध्यापकानां च कृते निर्देशाः

आवश्यकतानुसारं अन्येभ्यः विद्यालयेभ्यः योग्याः शिक्षकाः प्रेषयिष्यन्ते. यदि कस्मिंश्चित् क्षेत्रे उपलब्धाः शिक्षकाः न्यूनाः भवन्ति तथा च सर्वेषु शिक्षकविहीन-विद्यालयेषु व्यवस्था न सम्भवति, तर्हि सम्बद्ध-प्रधानाचार्येण तत्क्षणं लिखितरूपेण 'खण्ड-विकास-कार्यालयं' (BDO Office) अथवा 'उपमण्डलाधिकारि-कार्यालयं' (SDM Office) सूचितं करणीयम्. विद्यालयीय-शिक्षा-निदेशकः आशीष-कोहली-महोदयः प्रधानाचार्यान् मुख्याध्यापकान् च आदिष्टवान् यत् निर्वाचन-काले कस्यामपि स्थितौ विद्यालयाः स्थगिताः (बंद) न भवेयुः तथा च विद्यार्थिनां कापि असुविधा न स्यात्।

# कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालये सांख्यप्रतिपादितदुःखत्रयाणामुपरि व्याख्यानम्



**हिमसंस्कृतवार्ता डॉ . निशिकान्तपाण्डेयः**

**नलबारी (असम):** असमप्रदेशस्य नलबारी-नगरे स्थितस्य कुमारभास्करवर्म-संस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य सर्वदर्शनविभागेन तथा सर्वदर्शन-मन्थन-परिषदा च अद्य कश्चन अपूर्वः बौद्धिक-उत्सवः सम्पन्नः। विश्वविद्यालयस्य सर्वदर्शनविभागेन तथा सर्वदर्शन-मन्थन-परिषदा च मिलित्वा प्रचाल्यमानायाः १०८ व्याख्यानमालायाः विंशतितमं व्याख्यानं 'सांख्यकारिकायाः दुःखत्रयाणां विवेचनम् इति विषयमधिकृत्य आयोजितम्।अस्मिन् व्याख्यानकार्यक्रमे गुजरात-राज्यस्य प्रथितयशसः श्री-सोमनाथ-संस्कृत-विश्वविद्यालयस्
वेदविभागाचार्याः डॉ. राहुल कुमार झा महोदयाः मुख्यवक्तृरूपेण व्यासपीठम् अलङ्कृतवन्तः। डॉ. झा महोदयैः सांख्यदर्शनस्य आधारभूतग्रन्थस्य 'सांख्यकारिका' इत्यस्य प्रथमकारिकायाः आरभ्यः तृतीयकारिकां यावत् अतिगम्भीरं विवेचनं कृतम्। तेन प्रतिपादितं यत् मानवाः आध्यात्मिक-आधिभौतिक-आधिदैविक-दुःखैः सर्वदा पीडिताः भवन्ति। एतेषां त्रिविधदुःखानां मूलोच्छेदः केवलं दृष्टोपायैः (लौकिकसाधनैः) न सम्भवति, अपितु प्रकृत्यादिपञ्चविंशति तत्त्वानां ज्ञानेन एव जायते। आचार्यरञ्जितकुमारतिवारी महोदयस्य कुशलनिर्देशने इदं व्याख्यानं सफलं जाता। आचार्यतिवारी-महोदयैः स्वकीये उद्बोधने स्पष्टीकृतं यत् सांख्यदर्शनं न केवलं प्राचीनं चिन्तनम्, अपितु आधुनिक-मनोविज्ञानस्य आधारशिला अपि अस्ति। विभागस्य शोधच्छात्राणां कृते अयं विमर्शः ज्ञानवर्धकः प्रेरणादायी च आसीत्।कार्यक्रमस्य अध्यक्षतां कुर्वन्तः विश्वविद्यालयस्य माननीय-कुलगुरवः आचार्याः प्रह्लाद रा. जोशीवर्याः उपस्थिताः आसन्। तैः स्वकीयोद्बोधनेन ज्ञानमार्गे सांख्यस्य योगदानं विशेषतः अधोरेखितम्।अस्मिन् कार्यक्रमे विश्वविद्यालयस्य प्रशासनिकपक्षस्य, शैक्षणिकपक्षस्य च महती उपस्थितिः दृश्यते स्म। प्रमुखतया उपस्थिताः आसन्—आचार्यः मनोज कुमार शर्मा (कुलसचिवः), आचार्या मल्लिका कलिता(समकुलपतिः), डॉ. प्रशान्त ज्योति गौतम (परीक्षानियन्त्रकः), आचार्यः रणजीतकुमार तिवारी(सर्वदर्शनविभागाध्यक्षः), आचार्या उमा महेश्वरी बी (प्रथितविदुषी), सुश्री लोपामूद्रा गोस्वामी(सहायकाध्यापिका),
एतैः सहैव विश्वविद्यालयस्य नैकाः विभागाध्यक्षाः, संकायाध्यक्षाः, सहायकाचार्याः, विभागीयाः अतिथि-अध्यापकाः, शोधच्छात्राः, जिज्ञासवः छात्राः च उपस्थिताः आसन्।कार्यक्रमस्य अन्ते सर्वदर्शनविभागीयाचार्या उमा महेश्वरी बी महोदया सर्वेभ्यः अतिथिसज्जेभ्यः, छात्रेभ्यः, प्रबन्धनसमित्यै च धन्यवादं ज्ञापितवती। तया कार्यक्रमे सहयोगदानाय सर्वेषां प्रति कृतज्ञता प्रकटीकृता। कार्यक्रमस्य सुष्ठुसञ्चालनं कृतवती विभागीया छात्रा निशिता देवी।
अन्ते "सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः" इति शान्तिमन्त्रोच्चारणेन सह एषः भव्यः ज्ञानोत्सवः शान्त्या, आनन्देन च सम्पन्नताम् अगात्।

# आईपीएल २०२६: धर्मशालानगरे मुम्बईदलस्य विजयतिलकः, किंग्स-दलस्य निरन्तरं पञ्चमी पराजयः



इण्डियन प्रीमियर लीग (IPL) २०२६ इत्यस्य ५८तमं द्वन्द्वयुद्धं गुरुवासरे धर्मशालायाः अन्तर्राष्ट्रियक्रीडाङ्गणे पञ्जाब किंग्स तथा मुम्बई इण्डियन्स इत्यनयोः मध्ये अभवत्। मुम्बईदलेन 'पणकं' जित्वा प्रथमं कन्दुकप्रक्षेपणस्य (bowling) निर्णयः कृतः। पञ्जाब किंग्स दलेन प्रथमं फलकनम् (batting) कुर्वता २० चक्रेषु अष्टस्तोभानां-पातेन २०० धावनाङ्काः अर्जिताः। प्रत्युत्तरे मुम्बईदलेन १९.५चक्रेषु- चतुर्णां स्तोभानां-पातेन लक्ष्यं प्राप्तम्। रोमाञ्चकक्रीडायां मुम्बई इण्डियन्स दलेन पञ्जाब किंग्स ६ स्तोभ-क्रीडकैरन्तरालेन पराजितम्। अन्तिमे चक्र-मध्ये विजयाय मुम्बईदलाय १५ धावनाङ्कानाम् आवश्यकता आसीत्, या तैः सम्पादिता। तिलक वर्मा विजयस्य नायकः अभवत्, येन अविजित ७५ धावनाङ्कानां महत्त्वपूर्णा क्रीडा क्रीडिता। अपरपक्षे, पञ्जाबदलस्य एषा निरन्तरं पञ्चमी पराजयः आसीत्।

## रोहित-श्रेयसयोः कृते प्रशंसकानां दीवानपनम्

धर्मशाला: धर्मशालायाम् अस्मिन् द्वन्द्वयुद्धे दर्शकेषु अपूर्वः उत्साहः दृष्टः। क्रीडाङ्गणं प्राप्तवत्सु दर्शकेषु पञ्जाब-किंग्स-दलस्य नायकं श्रेयस अय्यरम् प्रति महती आसक्तिः लक्षिता। तत्रैव मुम्बई इण्डियन्स इत्यस्य प्रख्यातस्य फलकस्य रोहित शर्मा इत्यस्य समर्थकानाम् अपि महान् सम्मर्दः क्रीडाङ्गणे दृश्यते स्म।

# न्यायमूर्तिः स्वर्णकान्ता केजरीवाल-विरुद्धं कार्यानुष्ठानं कृत्वा मद्य-घोटाला-प्रकरणम् अत्यजत्



देहली-उच्चन्यायालयस्य न्यायमूर्तिः स्वर्णकान्ता शर्मा अरविन्दकेजरीवाल-मनीषसिसोदिया-सहितानाम् आम आदमी पार्टी (AAP) दलस्य अर्धदर्जनं नेतृणां विरुद्धं आपराधिक-मानहानि-प्रकरणम् आरभ्य मद्य-घोटाला-प्रकरणात् स्वं पृथक्कृतवती।इतः पूर्वं न्यायमूर्तिः शर्मा केजरीवालस्य इमां याचनां निरस्तवती आसीत्, किन्तु अधुना अवमानना-अभियोगस्य आरम्भात् एकस्य नियमस्य उल्लेखं कृत्वा न्यायमूर्तिः शर्मा एतं निर्णयं श्रावितवती। उच्चन्यायालयः केजरीवालस्य तां कामनां पूरितवान्, यदर्थं सः मुख्यन्यायाधीशाय पत्रं लिखितवान् तथा च 'रिक्यूजल' (Recusal) याचनां प्रविष्टवान् आसीत्।

**न्यायमूर्तिः शर्मा अवदत् यत्:**

"एतत् प्रकरणं काचित् अन्या पीठं (Bench) श्रोष्यति, यतोहि नियमानुसारं यः न्यायाधीशः अवमानना-प्रक्रियां प्रारभते, सः मुख्यप्रकरणं श्रोतुं न शक्नोति। 'रिक्यूजल' स्वस्थाने अस्ति, किन्तु अहं एतत् प्रकरणं अन्यन्यायालयं प्रेषयिष्यामि।"



हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा- ३८

न कस्यापि जीवने केवलं सुखं स्यात् अपि तु दुःखमपि भोक्तव्यं भवति प्राणिभिः अस्मिन् जगति। सुखदुःखयोः पर्यायक्रमः प्रवर्तते प्रत्येकं प्राणिजीवने। न केवलं मनुष्यस्य हि, अपि तु पशुपक्षिणोः, देवस्य, सर्वेषां जीवने सुखःदुखयोः परिवर्तनम् अनादिकालतः हि प्रवर्तमानमस्ति। सङ्कटकालोऽपि जीवने आयाति मध्ये मध्ये। प्रसङ्गेऽस्मिन् पुराकालिकोपमया तद्दर्शयितुं प्रयत्यते। पुराकाले कदाचित् द्रौपदी तथा गजेन्द्र इति द्वयोर्जीवने महत् कष्टम् समागतमासीत् । तयो एतादृशं भीषणं सङ्कटम् आगतमासीद् यत् ततः परित्रातुं स्वस्य आत्मीयानाञ्च सर्वापि शक्तिर्निष्फला अभवत्; द्रौपदी येषामुपरि अवलम्बिता आसीत् ते काष्ठमूर्तिवत् चेष्टारहिताः सन्तः राजसभायाम् उपविष्टवन्त आसन्। तत्समये एवम् अभात् यत् किञ्चित् पश्चात् हि शूरवीराणां पाण्डवानां पत्नी द्रौपदी सभामध्ये निरावरणा भवेदिति। तत्समये हि परमसङ्कटापन्नाया द्रौपद्या मुखतः आर्तध्वनिर्निस्सृत एवम्-

***गोविन्द द्वारकावासिन् कृष्ण गोपीजनप्रिय।।***
***कौरवैः परिभूतां मां किं न जानासि केशव।।*** **हे नाथ! हे रमानाथ! व्रजनाथार्तिनाशन! कौरवार्णवमग्रां मामुधरस्व जनार्दन।।**
**कृष्ण कृष्ण महायोगिन् विश्वात्मन् विश्वभावन। प्रपन्नां पाहि गोविन्द कुरुमध्येऽवसीदतीम्।।"**

इति।

द्रौपदी भगवन्तं श्रीकृष्णं प्रति निरुपायवशतः रुदन्ती अत्यन्तं भावार्तपूर्णां गभीरनामप्रार्थनां कुर्वती, स्वकीयाः सर्वाः अपि चेष्टा विहाय भगवतः पूर्णशरणं गतवती, येन कारणेन च भगवान् वस्त्ररूपे प्रकटीभूय करुणावशीभूतस्सन् च वस्त्रदानेन द्रौपद्या परमलज्जां निवारितवान्। एवमेव स्वदेहबलस्य अहङ्कारेण मदमत्तो गजेन्द्रो ग्राहस्य महाबन्धने अपतत्। ततो मोक्तुं सः स्वदेहस्य सर्वमपि बलं प्रयुक्तवान्, एवञ्च आत्मीयानां साहाय्यं स्वीकृतवान्। परन्तु तत्सर्वं निरर्थकं जातम्। ग्राहः तं शनैः जलमध्ये नेतुमारभत। अनन्यगतिकतया, निरुपायवशतो वा तस्यापि मुखाद् एतादृशः आर्तध्वनिर्निःसृतः-

"ओं नमो भगवते तस्मै यत एतच्चिदात्मकम्।
पुरुषायादिबीजाय परेशायाभिधीमहि।।
यस्मिन्निदं यतश्चेदं येनेदं य इदं स्वयम्।
योऽस्मात् परस्माच्च परस्तं प्रपद्ये स्वयम्भुवम्।।"इति।

एतत्प्रसङ्गद्वयस्य आशयो यत् सङ्कटकाले, अथवा यत्समये स्वस्य जीवनसंरक्षणस्य कोऽपि लौकिकमार्गो नावलोक्यते, तत्समये केवलम् एकमात्रं रक्षकत्वेन श्रीभगवान् हि अवशिष्यते। अतस्तत्समये जीवो भगवतः शरणापन्नः स्यात्। अन्यथा जीवः सांसारिकासक्तिकारणतः श्रीभगवन्तं विस्मरति। अतो नियततया श्रीभगवन्नामग्रहणस्य अभ्यासो जीवस्य कृते युक्त एव, येन च नित्याभ्यासेन अन्तिमकाले भगवत्स्मरणं सम्भवेदिति।

# "लौकिकन्यायकोशः"
## "घृतदग्धन्यायः"



अग्निना दग्धे शरीरावयवे जलम् अन्यं किमपि द्रवपदार्थं वा स्थापयामः तर्हि तत्र स्फोटाः भवन्ति। परन्तु घृतं स्थापितं चेत् तस्य अवयवस्य ज्वलनं नश्यति व्रणस्य उपशमनं च भवति। एवं बहुशः प्रतिकूलरूपेण भासमानः पदार्थः अनुकूलोऽपि भवति चेत् अस्य न्यायस्य प्रयोगो भवति।

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्

# अरुणाचले मन्त्रिणां विदेशयात्रासु एकवर्षं यावत् प्रतिबन्धः, अनुयानस्य (काफिले) आकारे पञ्चाशत् प्रतिशतं न्यूनता



अरुणाचलप्रदेशसर्वकारेण शासकीयव्ययस्य न्यूनीकरणाय प्रमुखाः निर्णयाः स्वीकृताः, येषु मन्त्रिणां विदेशयात्रासु एकवर्षस्य प्रतिबन्धः तथा च अनुयानस्य (conveyance/convoy) आकारे ५० प्रतिशतं न्यूनता सम्मिलिता अस्ति। एतेषां व्ययकर्तन-उपायानाम् उद्देश्यं प्रशासनिककार्येषु परिष्कारः तथा च आभासी-उपवेशनानां (virtual meetings) ई-कार्यालय-प्रणाल्याः च प्रोत्साहनं वर्तते। अरुणाचलप्रदेशसर्वकारेण व्ययस्य लाघवाय, प्रशासनिककार्यकुशलतायाः वर्धनाय तथा च सर्वेषु विभागेषु चिरस्थायि-शासन-पद्धतीनां विकासाय व्ययकर्तनस्य दक्षता-उपायस्य च एका शृङ्खला घोषिता अस्ति। आधिकारिकसूचनानुसारं, नूतनोपायेषु आगामि-एकवर्षं यावत् मन्त्रिणां शासकीय-अधिकारिणां च विदेशयात्रासु पूर्णप्रतिबन्धः निहितः अस्ति। अतिरिक्ततया, इन्धनस्य रक्षणाय आधिकारिक-आगमनागमनस्य सुगमीकरणाय च मुख्यमन्त्रिणः, उपमुख्यमन्त्रिणः तथा अन्यमन्त्रिणां च अनुयाने सदस्यानां संख्या ५० प्रतिशतं यावत् न्यूनीकृता भविष्यति।

# रक्तदुर्ग-विस्फोटप्रकरणे ७५०० पृष्ठानां दोषारोपपत्रं (Charge sheet) समर्पितम्, एनआईए (NIA) दलेन १० जनाः आरोपिताः



राष्ट्रिय-अन्वेषण-अभिकरणेन (NIA) गतवर्षे रक्तदुर्गस्य (Red Fort) समीपे अभवत् कार-विस्फोटप्रकरणे दोषारोपपत्रं प्रविष्टम्। ७५०० पृष्ठानाम् अस्मिन् दोषारोपपत्रे १० जनाः आरोपिताः कृताः सन्ति। अस्मिन् विस्फोटे ११ जनानां मृत्युः अभवत् तथा च बहवः जनाः आहताः अभवन्। पटियाला-हाउस-न्यायालयः दोषारोपपत्रस्य विचारणाय जून-मासस्य चतुर्थं दिनाङ्कं निश्चितवान् अस्ति। गतवर्षस्य नवम्बर-मासस्य १० दिनाङ्के राष्ट्रियराजधान्यां एकस्यां कार-याने स्थापितस्य शक्तिशालिनः विस्फोटक-यन्त्रस्य विस्फोटेन क्षेत्रे महती विनाशलीला अभवत्, पार्श्वस्थानां सम्पत्तीनां च व्यापकं हानिः अभवत्।पटियाला-हाउस-न्यायालयस्थे एनआईए-विशेषन्यायालये प्रविष्टस्य दोषारोपपत्रस्य अनुसारं १० आरोपिषु मुख्यषड्यन्त्रकारी डा. उमर उन नबी अपि सम्मिलितः अस्ति, यस्य विस्फोटसमये मृत्युः अभवत्। सः 'अंसार गजवत-उल-हिन्द' (AGUH) इति आतङ्कवादि-सङ्घटनेन सह सम्बद्धः आसीत्। एतत् सङ्घटनं भारतीय-उपमहाद्वीपे 'अल-कायदा' इत्यस्य सहायकं गुटम् अस्ति।



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। प्रथमा वार्ता अतीव विस्मयकारिणी अस्ति।
एकोनषष्टि- सहस्र-वर्षेभ्यः पूर्वं पश्चादुषोमानवैः (नियण्डर्थल- मानवैः) दन्तछिद्रं चिकित्सितम् इति शोधकर्तृभिः ज्ञातम्।

**नन्दिनी-** सत्यम्, प्राचीनकाले अपि दन्त-वैद्याः आसन्! एतस्य उपरि टिप्पणीं करोमि
यत् तदा शुल्कं न्यूनं स्यात्। किन्तु अद्य, अमेरिकादेशे एकया भारतीयनार्या जलनलिकायाः अल्पदोषस्य निवारणाय प्रायेण पञ्चाशदुत्तर- द्वि-शतम् डालरमुद्राः दत्ताः। सा अतीव विस्मिता जाता।

**काव्या-** अहो, एतावान् धनव्ययः तु पीडादायकः। जल- निवारणानन्तरं सम्प्रति
कार्यालय-वार्तां शृणु। प्रधानमन्त्रिणः निवेदनात् परं शादीडोट्काम- संस्थायाः प्रमुखेण कर्मकरेभ्यः एकदिवसात्मकं गृहस्थित-कार्यं घोषितम् अस्ति।

**नन्दिनी-** एतत् तु उत्तमम् इन्धन-रक्षकम् कार्यम्। श्रमस्य अनन्तरं धनस्य वार्ता अस्ति। एकेन जनेन अष्टवर्षेभ्यः पूर्वमेव गृहर्णम् पूर्णतया परिशोधितम् अस्ति। तस्य सुहृद्भिः तु अयं 'मूर्खतापूर्णः निर्णयः' इति कथितम्।

**काव्या-** आम् शेषधनम् इतरनिवेशार्थम् उपयोज्यम् एव।